॥ ॐ ॥

कुन्तीकृता

॥ भगवत्स्तुतिः ॥

{कृष्णस्तुतिः}

नमस्ये पुरुषं त्वाद्यमीश्वरं प्रकृतेः परम् ।
अलक्ष्यं सर्वभूतानामन्तर्बहिरपि ध्रुवम् ॥ 1 ॥

मायायवनिकाच्छन्नो मयाधोऽक्षजमर्त्यया ।
न लक्ष्यसे मूढदृशा नटो नाट्यचरो यथा ॥ 2 ॥

तथा परमहंसानां मुनीनाममलात्मनाम् ।
भक्तियोगविधानार्थं कथं पश्येमहि स्त्रियः ॥ 3 ॥

कृष्णाय वासुदेवाय देवकीनन्दनाय च ।
नन्दगोपकुमाराय गोविन्दाय नमो नमः ॥ 4 ॥

नमः पङ्कजनाभाय नमः पङ्कजमालिने ।
नमः पङ्कजनेत्राय नमस्ते पङ्कजाङ्घ्रये ॥ 5 ॥

यथा हृषीकेश खलेन देवकी कंसेन रुद्धातिचिरं शुचार्पिता ।
विमोहिताहं च सहात्मजा विभो त्वयैव नाथेन मुहुर्विपद्गणात् ॥ 6 ॥

विषान्महाग्नेः पुरुषाददर्शनादसत्सभायाः वनवासकृच्छ्रतः ।
मृधे मृधेऽनेकमहारथास्त्रतो द्रौण्यस्त्रतश्चास्म हरेऽभिरक्षिताः ॥ 7 ॥

विपदः सन्तु नः शश्वत्तत्र तत्र जगत्पते ।
भवतो दर्शनं यत्स्यादपुनर्भवदर्शनम् ॥ 8 ॥

जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान् ।
नार्ह इत्यभिधातुं वै त्वामकिञ्चनगोचरम् ॥ 9 ॥

नमोऽकिञ्चनवित्ताय निवृत्तगुणवृत्तये ।
आत्मारामाय शान्ताय कैवल्यपतये नमः ॥ 10 ॥

मन्ये त्वां कालमीशानं अनादिनिधनं परम् ।
समं चरन्तं सर्वत्र भूतानां यन्मिथः कलिः ॥ 11 ॥

न वेद कश्चिद्भगवंश्चिकीर्षितं
तवेहमानस्य नृणां विडम्बनम् ।
न यस्य कश्चिद्दयितोऽस्ति कर्हिचित्
द्वेष्यश्च यस्मिन् विषमा मतिर्नृणाम् ॥ 12 ॥

जन्म कर्म च विश्वात्मन्नजस्याकर्तुरात्मनः ।
तिर्यङ्नृपशुयादस्सु तदत्यन्तविडम्बनम् ॥ 13 ॥

गोप्याददे त्वयि कृतागसि दाम तावत्
या ते दशाश्रुकलिलाञ्जनसम्भ्रमाक्षम् ।
वक्त्रं विनम्य भयभावनया स्थितस्य
सा मां विमोहयति भीरपि यं बिभेति ॥ 14 ॥

केचिदाहुरजं जातं पुण्यश्लोकस्य कीर्तये ।
यदोः प्रियस्यान्ववाये मलयस्येव चन्दनम् ॥ 15 ॥

अपरे वसुदेवस्य देवक्यां याचितोऽभ्यगात् ।
अजस्त्वमस्य क्षेमाय वधाय च सुरद्विषाम् ॥ 16 ॥

भारावतरणायान्ये भुवो नाव इवोदधौ ।
सीदन्त्या भूरिभारेण जातो ह्यात्मभुवार्थितः ॥ 17 ॥

भवेऽस्मिन् क्लिश्यमानानामविद्याकामकर्मभिः ।
श्रवणस्मरणार्हाणि करिष्यन्निति केचन ॥ 18 ॥

शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः
स्मरन्ति नन्दन्ति तवेहितं जनाः ।

त एव पश्यन्त्यचिरेण तावकं
भवप्रवाहोपरमं पदाम्बुजम् ॥ 19 ॥

अप्यद्य नस्त्वं स्वकृते हितः प्रभो
जिहाससि स्वित्सुहृदोऽनुजीविनः ।
येषां न चान्यद्भवतः पदाम्बुजात्
परायणं राजसु योजितांहसाम् ॥ 20 ॥

ते वयं नामरूपाभ्यां यदुभिः सह पाण्डवाः ।
भवतो दर्शनं यर्हि हृषीकाणामिवेशितुः ॥ 21 ॥

नेयं शोभिष्यते तत्र यथेदानीं गदाधर ।
त्वत्पदैरङ्किता भाति स्वलक्षणविलक्षितैः ॥ 22 ॥

इमे जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः ।
वनाद्रिनधुदन्वन्तो ह्येधन्ते तव वीक्षिताः ॥ 23 ॥

अथ विश्वेश विश्वात्मन् विश्वमूर्ते स्वकेषु मे ।
स्नेहपाशमिमं छिन्दि दृढं पाण्डुषु वृष्णिषु ॥ 24 ॥

त्वयि मेऽनन्यविषया मतिर्मधुपतेऽसकृत् ।
रतिमुद्वहतादद्धा गङ्गेवौघमुदन्वति ॥ 25 ॥

श्रीकृष्ण कृष्णसख वृष्णिवृषावनिध्रुक्-

राजन्यवंशदहनामरवन्द्यवीर्य ।

गोविन्द गोद्विजसुरार्तिहरावतार

योगेश्वराखिलगुरो भगवन्नमस्ते ॥ 26 ॥

॥ इति श्रीमद्भागवते प्रथमस्कन्धे अष्टमाध्याये भगवत्स्तुतिः ॥

* * *

Extracted & Proofed by: **Dr. Diddigi Vamsi Krishna M.A., Ph.D.**

Font Courtesy: **www.adishila.com (Adishila Letterpress Semibold)**

Any corrections are accepted through given Email ID: **shimshuprati@gmail.com**